वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

# शास्त्रे सतां लक्षणम्

**डॉ. पङ्कजकुमार एस. रावलः**[१]

## प्रस्तावना

**क्वचिच्छिष्टाः क्वचिद्भ्रष्टाः क्वचिद्भूतपिशाचवत्।**
**नानारूपधरा योगी विचरन्ति महीतले॥**

**सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः।**
**निर्ममा निरहङ्कारा निर्द्वन्द्वा निष्परिग्रहाः॥**

भारतीयसनातनसंस्कृतेः प्राणतत्त्वभूताः सन्तः समग्रेऽस्मिन् विश्वे पूज्याः मान्याः सेव्याश्च सन्ति। शास्त्रेषु बहुधा सतां महिमा वर्णितः वर्तते। सद्गुणानाम् आकरः परोपकारपरायणः धर्मकर्मसु प्रवृत्तः सतां स्वभावः सर्वदा विविधेभ्यः जनेभ्यः सन्तं भिन्नं करोति। भारतीयाध्यात्मिकपरम्परायाम् एकमपि शास्त्रं तादृशं नास्ति यत्र सतां माहात्म्यं न वर्णितं स्यात्। सन्तः गुणालयाः भवन्ति यथा एकमपि शास्त्रं विना सन्तः पूर्णाः न भवन्ति तद्वत् नैकोऽपि सद्गुणः विना सन्तं गुणत्वमाधत्ते।

बृहन्नारदीयपुराणे सत्सु भगवति च महापुरुषैः शास्त्रकारैः न भेदः कृतः। सर्वभूतहिते रतः, द्वेषरहितः, जितेन्द्रियः, शान्तः, मनसा वचसा शरीरेण च नान्यं पीडयति, सेवापरायणः, निन्दारहितः, गुणग्राही, प्राणिषु आत्मबुद्धिः, समदर्शी, सत्यवादी, गोब्राह्मणप्रतिपालः, तीर्थसेवी, प्रसन्नः, उदारः, आदर्शश्रोता, आनन्दितः, अतिथिसत्कृतः, भगवत्सु अभेदबुद्धिः, शिखासूत्रधारी, व्रतपरायणः एतादृशः उत्तमः सत्पुरुषः भगवते रोचतेऽति स्वयं देवर्षिनारदः नारदपुराणे वर्णयति। शास्त्रेषु महात्मा, सन्तः, महापुरुषः, ब्रह्मवादी, लोकोत्तरः, परोपकारी, धर्मात्मा, धार्मिकः, नैतिकः, जीवन्मुक्तः, साधुः, भक्तः, सत्पुरुषः, ऋषिः, मुनिः, महर्षिः इत्थं नैके शब्दाः सज्जनवाच्याः महापुरुषसंज्ञकाः सतां लक्षणभूताः स्थाने स्थाने देशे देशे काले काले प्रयुक्ताश्च सन्ति।

## ज्यौतिषशास्त्रदृष्ट्या सतां लक्षणानि (साधुयोगः/सन्तयोगः)

---

[१] प्राध्यापकः, पुराणेतिहासः, श्री सोमनाथसंस्कृतविश्वविद्यालयसञ्चालितः, संस्कृतमहाविद्यालयः, वेरावलम्, गीरसोमनाथः, गुजरातम्-३६२२६६, दूरभाषः -९८७९३२९८९८

कदाचित् प्रश्नः भवति सन्तः जन्मना भवन्ति वा परिस्थित्यनुकूलं व्यावहारिकं जगत् सतां निर्माणं करोति? तर्हि अत्र ज्यौतिषशास्त्रं साहाय्यं करोति यथा-

**नवमे पञ्चमे वापि सौष्ठ्यादिगुणभाक्तनौ।**
**जीवन्मुक्तस्तदा मर्त्यो जायते धरणीतले॥ (मानसागरी)**

महापुरुषाणां जन्मकुण्डल्यां ग्रहगतिः विशिष्टा भवति। नवमे पञ्चमे जन्मलग्ने च शुभग्रहाणां दृष्टिः स्वगृहे उच्चस्थाने च सौम्यग्रहाणां स्थितिर्यदा भवति तदा स सत्पुरुषः भवति जीवन्मुक्तो वा निगद्यते।

**धने धर्मे सुते लग्ने दशमेऽपि शुभग्रहाः।**
**बलाढ्याश्चेत्तदा साधुयोगोऽयं सम्प्रकीर्तितः॥(मानसागरी)**

जन्मकुण्डल्यां द्वितीये नवमे पञ्चमे जन्मलग्ने दशमे वा कस्मिँश्चिदेकस्मिन् स्थाने शुभग्रहः भवति चेत् स साधुः भवत्येव।

## श्रीमद्भागवतमहापुराणालोके सतां लक्षणम्

यस्य पवित्रं चरित्रं लक्ष्यभूतं भवति ध्येयपूर्णं भवति आचरणीयं भवति तल्लक्षणं तेन लक्षणेन च विभूषितः सत् श्रीमद्भागवतमहापुराणे बहुधा वर्णितः वर्तते-

**"कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम्।**
**सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः॥**
**कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः।**
**अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः॥**
**अप्रमत्तो गभीरात्मा धृतिमाञ्जितषड्गुणः।**
**अमानी मानदः कल्पो मैत्रः कारुणिकः कविः॥" (श्रीमद्भा.-११/११/२९-३१)**

**"तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम्।**
**अजातशत्रवः शान्ताः साधवः साधुभूषणाः॥**
**मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्।**
**मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः॥**
**मदाश्रयाः कथामृष्टाः शृण्वन्ति कथयन्ति च।**
**तपन्ति विविधास्तापा नैतान् मद्गतचेतसः॥**

**त एते साधवः साध्वि सर्वसङ्गविवर्जिताः।**
**सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते॥" (श्रीमद्भा.- ३/२५/२१-२४)**

**"सर्वभूतेषु यः पश्येत् भगवद्भावमात्मनः।**
**भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥" (श्रीमद्भा.११/२/४५)**

**"विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः।**
**प्रणयरशनया धृदताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः॥" (श्रीमद्भा.११/२/५५)**

सत्पुरुषः भगवद्भक्तः भवति। यः भक्तः अस्ति स च भगवतः प्रियोऽस्ति तदर्थं श्रीमद्भवगद्गीतायां **"यो मद्भक्तः स मे प्रियः"** इति स्वयं भगवता उद्घोषितं वर्तते। यथा भगवान् गुणातीतः अस्ति तद्वत् भागवतोत्तमः भगवद्भक्तः **'गुणातीतः स उच्यते'**। यत्र सन्तत्वं प्रकटितं भवति स च भगवत्कृपया **'क्षिप्रं भवति धर्मात्मा'**।

यस्मिन् 'इदं न मम' अयं भावः दृढः स्थिरश्च वर्तते स च सत्पुरुषोऽस्ति। सताम् एकं लक्षणम् अनवरततया दृश्यते स च सत्सङ्गपरायणः भवति।

**"स मृग्यः श्रेयसां हेतुः पन्थाः सन्तापवर्जितः।**
**अनवाप्तश्रमं पूर्वे येन सन्तः प्रतस्थिरे॥"**

मम श्रेयः कुत्र निहितं तदन्वेषणे सदा सर्वदा यः प्रवृत्तो भवति प्राकृतिकान् नियमान् सर्वदैवानुसरति भाषावस्त्राहारव्यवहारभेदैः यः सर्वदा मुक्तः भवति स च सत्पुरुषोऽस्ति। जागृतावस्थायां

**"अणुभ्यश्च बृहद्भ्यश्च शास्त्रेभ्यः कुशलो नरः।**
**सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः॥" (श्रीमद्भागवत.-४//)**

सत्सु अपरिग्रहवृत्तिः भवति किन्तु गुणग्रहणे सतां लक्षणं माधुकरी भवति यथा षट्पदः सारं सारं गृह्णाति तद्वत् अयमपि गुणग्राही भवति। **"सन्तः स्वयं परहिते विहिताभियोगाः" (राजर्षिः भर्तृहरिः)**। सतां स्वभावः सर्वदैव परहिते संलग्नः भवति। भगवतः अनन्तरं परमार्थः शब्दः यदि कुत्रचित् विलसति चेत् सत्सु विलसति।सत् इति शब्दे अस् धातोः शतृप्रत्ययान्तरूपं भवति। ईश्वरस्य सत्तायां ईश्वरस्य व्यवस्थायां वेदादिशास्त्रेषु जन्मपुनर्जन्मविचारे स्वस्मिन् च यस्य स्थिरा बुद्धिर्भवति एवञ्च वर्तमानकाले एव जीवति स च सत् अस्ति।**"सर्वदा विद्यमानं प्रलयेऽपि नाशाभावात्"**।

**श्रीमद्भगवद्गीतायां सतां लक्षणम्**

**"ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।**
**ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥**
**तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।**
**प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥**
**तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।**
**दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥**
**सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते।**
**प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥**
**यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।**
**कर्म चैव तदर्थीयं सदित्येवाभिधीयते॥**
**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।**
**असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥" (भगवद्गीता १७/२३-२८)**

**बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।**
**वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः॥ (भगवद्गीता ७/१९)**

**"तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः,**
**सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान्।**
**मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय स्वान् गुणान्,**
**कीर्तिं पालय दुःखिते कुरु दयामेतत् सतां लक्षणम्॥" (नीतिशतकम्)**

सांसारिकैः सतां स्वभावः ज्ञातुं न शक्यते अत एव-**"वज्रादपि कठोराणि मृदूनि कुसुमादपि। लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति।"** (उत्तररामचरिते भवभूतिः) महापुरुषाणां स्वभावः भगवन्तं शङ्करमिव विषामृतयुतो भवति।**"गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः। शिरसा धरते पूर्वं परं कण्ठे नियच्छति॥"** यथा भगवतः शङ्करस्य कण्ठे विषं मस्तके चन्द्रमसः अमृतं तिष्ठति तद्वत् महापुराषाणां जीवने अपि गुणदोषौ सहैव तिष्ठतः अपितु ते चिन्तां चिन्तनं च गुणानामेव कुर्वन्ति-**"मनसि वचसि काये पुण्यपीयूषपूर्णाः त्रिभुवनमुपकारः श्रेणिभिः प्रीणयन्ति। परगुणपरमाणुं पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥" (नीतिशतकम्)** महानुभावानां स्वभावः स्वान् गुणान् ख्यापयति परगुणकथने उदारचरिताः भवन्ति निजगुणकथने दरिद्राः भवन्ति। महापुरुषाणां सतां स्वभावः भवति-**"आत्मनः प्रतिकूलानि परेषां न समाचरेत्" (महाभारते आदिपर्वणि)** इति। सामान्यपुरुषेण सह महापुरुषाणां स्वभावः सहजो भवति। महापुरुषाणां दृष्ट्या न कश्चित् धनी न

कश्चिद्दरिद्रः, न कश्चित् कुलीनः न कश्चित् निष्कुलीनः, न कश्चिदुत्तमः न कश्चिदधमः। सतां लक्षणाय एव भक्तप्रवरः नरसिंहमहेतागीतायां वैष्णवशब्देन सताम् अष्टादशलक्षणानि प्रतिपादयति गीतं सुप्रसिद्धमेवास्ति-

**"वैष्णवजन तो तेने रे कहीए जे पीड पराई जाणे रे,**
**परदुःखे उपकार करे तोये मन अभिमान न आणे रे."**

सत्सु वैराग्यः स्वतः सिद्धो भवति। सारल्यं तेषामाचरणे दरीदृश्यते। भगवतः शङ्करस्य समुपासकाः भवन्तीति कृत्वा करुणा अपि तेषां नेत्राभ्यां व्यवहाराच्च वर्षति। महापुरुषाणां स्वभावे एकं लक्षणं तादृशमप्यस्ति- **"मेले में अकेला अकेले में मेला"**। इमे सन्निष्ठाः शास्त्रनिष्ठाश्च भवन्ति। एतेषां जीवनं विलक्षणं एवञ्च समाजोपकारकं राष्ट्रसेवापरायणं च भवति। **"નથી વિદ્વતા વાપરી દેશદાઝે, નથી વાપરી પાઈ પરલોક કાજે, નથી કામ કીધા સ્વદેશાભિમાની, વૃથા જન્મ ખોયો કરી શી કમાણી ?"** शास्त्रभक्तिः राष्ट्रभक्तिश्च एतेषु विलसति। सज्जनानामेकं लक्षणं तदप्यस्ति यत् समाजे ते किमपि प्रदातुमेव विचरन्ति न तु ग्रहीतुम्।**सर्वे भवन्तु सुखिनः (गरुडपुराणम्)** इति सांसारिकाणां केवलं वचसि भवति अपितु महापुरुषाणामाचरणे भवति एतदपि सतां लक्षणम्।**धर्मस्य विजयो भूतादधर्मस्य पराभवः। प्राणिनां चैव सद्भावः भूयाद्विश्वस्य मङ्गलम्॥ (आदिशङ्कराचार्याः)** शास्त्रस्य महत्त्वपूर्णानि वचनानि सन्तः जीवन्ति न केवलं वदन्ति यथा-**"अयं निजः परो वेति गणना लघुचेतसाम्। उदारचरितानां तु वसुधैव कुटुम्बकम्॥"(मुद्गलोपनिषद्),यत्र भवति विश्वैकनीडम्, सङ्गच्छध्वं संवदध्वं संवो मनांसि जानताम् (ऋग्वेदः),समानी व आकूतिः समाना हृदयानि वः (ऋग्वेदः),माता भूमिः पुत्रोऽहं पृथिव्याः (अथर्ववेदः), सह नाववतु, सह नौ भुनक्तु (कठोपनिषद्), एक एव न भुञ्जीयात्, परस्परदेवो भव, सत्यं वद, धर्मं चर, अहिंसा परमो धर्मः (तैत्तिरीयोपनिषद्), भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः (मनुस्मृतिः), आ नो भद्राः क्रतवो यन्तु विश्वतः(शुक्लयजुर्वेदः), भद्रं कर्णेभिः शृणुयाम देवाः(शुक्लयजुर्वेदः), तन्मे मनः शिवसङ्कल्पमस्तु(शुक्लयजुर्वेदः), आत्मदीपो भव, असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मा अमृतं गमय (बृहदारण्यकोपनिषद्), छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे। फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥ (सु.र.भा.), मम सुखं सर्वेषां सुखम्, परस्य दुःखं मम दुःखम्** इति स्वभावेन जीवन्तः रन्तिदेवसदृशाः प्रार्थयन्ति- **"न त्वहं कामये राज्यं न स्वर्गं न पुनर्भवम्। कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्॥"(महाभारतम्)** सतां च एकं अन्यद् लक्षणं गरुडपुराणे प्रोक्तं यथा- **"न प्रहृष्यति सम्माने नापमाने च कुप्यति। न क्रुद्धः परुषं ब्रूयादेतद्धि साधुलक्षणम्॥"(गरुडपुराणम्)** सन्तः स्वभावेन महान्तः भवन्ति तदर्थं महतां लक्षणं गुर्जरभाषायामुक्तं यथा- **"માન, અમાન અને અપમાન આ ત્રણ જેને સમાન તેનું નામ મહાન."** साधुशब्दस्य अर्थः भवति साध्नोति परकार्यमिति साधुः। भगवद्भक्तः सत्पुरुषः त्रीणि चिह्नानि स्वतः एव दर्शयति तद्यथा-

"नयनं गलदश्रुधारया, वदनं गद्गदरुद्धया गिरा।
पुलकैर्निचितं वपुः कदा तव नामग्रहणे भविष्यति॥"(चैतन्यमहाप्रभुः)

"बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः
कण्ठेन स्वरगद्गदेन नयने नोद्गीर्णबाष्पाम्बुना।
नित्यं त्वच्चरणारविन्दयुगलद्ध्यानामृतास्वादिना-
मस्माकं सरसीरुहाक्ष सततं सम्पद्यतां जीवनम्॥"

(चैतन्यमहाप्रभुः)

## अन्यग्रन्थेषु सतां लक्षणम्

"उदेति सविता रक्तः रक्त एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥" (साहित्यदर्पणः)

"उपकारिषु यः साधुः साधुत्वे तस्य को गुणः।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते॥" (पञ्चतन्त्रे नीतिशतके च)

"मनस्यन्यद् वचस्यन्यद् कर्मण्यन्यद् दुरात्मनाम्।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्॥" (सु.र.भा.)

"तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥" (मनुस्मृतिः)

"एते सत्पुरुषाः परार्थघटकाः स्वर्थान् परित्यज्य ये,
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये,
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥" (नीतिशतकम्)

"भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्भूरि विलम्बिनो घनाः।
अनुद्धता सत्पुरुषः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥" (अभिज्ञानशाकुन्तलम्)

"उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शिततां याति वह्निः।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम्॥" (हितोपदेशः, मित्रलाभः)

"संसारविषवृक्षस्य द्वे एव मधुरे फले।
सुभाषितं च सुस्वादु सद्भिश्च सह सङ्गमः॥" (सु.र.भा.)

"दुर्लभं त्रयमेवैतत् दैवानुग्रहहैतुकम्।
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः॥" (विवेकचूडामणिः)

"असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां सङ्गः गङ्गाम्भः शिवपूजनम्॥" (विवेकचूडामणिः)

"पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम्।
नाप्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहितेषु हिताभियोगाः॥" (नीतिशतकम्)

"चन्दनं शीतलं लोके चन्दनादपि चन्दमाः।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसन्गतिः॥" (सु.र.भा.)

"गङ्गापापं शशीतापं दैन्यं कल्पतरुस्तथा।
पापं तापं च दैन्यं च हन्ति साधुसमागमः॥" (गर्गसंहिता, अश्वमेधखण्डे-६२/९)

"शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।
साधवो न हि सर्वत्र चन्दनं न वने वने॥" (चाणक्यनीतिः)

"लौकिकानां हि साधूनां अर्थो वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥" (उत्तररामचरितम्)

"श्लोकस्तु श्लोकतां याति यत्र तिष्ठन्ति साधवः।
लकारो लुप्यते तत्र यत्र तिष्ठन्त्यसाधवः॥ (सु.र.भा.)

"यथास्थितमिदं यस्य व्यवहारवतोऽपि च।
अस्तङ्गतं स्थितं व्योम स जीवन्मुक्त उच्यते॥
नोदेति नास्तमायाति सुखेदुःखे मुखप्रभा।
यथा प्राप्ते स्थितिर्यस्य स जीवन्मुक्त उच्यते॥
यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते।
यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते॥
रागद्वेषभयादीनामनुरूपं चरन्नपि।

**योऽन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते॥**
**यस्य नाहं कृतो भावो बुद्धिर्यस्य न लिप्यते।**
**कुर्वतोऽकुर्वतो वापि स जीवन्मुक्त उच्यते॥**
**यस्मान्नो द्विजते लोको लोकान्नो द्विजते च यः।**
**हर्षामर्षभयान्मुक्तः स जीवन्मुक्त उच्यते॥**
**शान्तसंसारकलनः कलावानपि निष्कलः।**
**यः सचित्तोऽपि निश्चित्तः स जीवन्मुक्त उच्यते॥**
**यः समस्तार्थजातेषु व्यवहार्यपि शीतलः।**
**परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते॥"**

**(योगवासिष्ठरामायणम्- श्रीभास्करकण्ठविरचितायां श्रीमोक्षोपायटीकायां उत्पत्तिकरणे ९/४, श्रीवशिष्ठः रामाय उत्तरति)**

महापुरुषाणां सतां सङ्गः कीदृशः तत्सन्दर्भे देवर्षिनारदोऽपि स्वभक्तिसूत्रे कथयति- **"महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च।"** पद्मपुराणान्तर्गते भागवतमाहात्म्येऽपि सतां समागमः बहुदुर्लभो दर्शितोऽस्ति।**"भाग्योदयेन बहुजन्मसमर्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै। अज्ञानहेतुकृतमोहमदान्धकारनाशं विधाय हि तदोदयते विवेकः॥"(भागवतमाहात्म्ये- २/७६)** शास्त्रेषु मानवजीवनं प्रायः जलबुद्बुदवत् बहुचञ्चलं दर्शितमस्ति। क्षणभङ्गुरं जीवनमेतत् जीवनेऽस्मिन् सतां दर्शनं सतां सङ्गः, सतां सान्निध्यं च लभते चेद् अनुग्रहोऽयम्।**"नलिनीदलगतजलवत् तरलं तद्वज्जीवनमतिशयचपलम्। क्षणमपि सज्जनसङ्गतिरेका भवति भवार्णवतरणे नौका॥"(मोहमुद्गलस्तोत्रम्)** साधुपुरुषाणां सङ्गः संसारसागरं तर्तुं नौका कथितास्ति। श्रीमद्भागवतमहापुराणेऽपि भगवान् कपिलः सतां माहात्म्यं गायति- **"सतां प्रसङ्गान् मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः। तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति॥"(भागवतम्- ३/२५/२५)** महापुरुषाणां सङ्गेन अध्यात्मजगति श्रद्धा पुष्टा भवति भगवति रतिर्भवति, सैव रतिः भक्तिर्भवति तया भक्त्या च मुक्तिर्भवति, एतस्य मूलमस्ति महापुरुषाणां सङ्गः।**"जाड्यं धियो हरति सिञ्चति वाचि सत्यं मानोन्नतिं दिशति पापमपाकरोति। चेतः प्रसादयति दिक्षु तनोति कीर्तिं सत्सङ्गतिः कथय किं न करोति पुंसाम्॥"(नीतिशतकम्)** सतां सङ्गस्य किं फलम् ? तत् नृपो भूत्वा राजर्षिभर्तृहरिरपि जानाति तथा च कथयति- **"दूरीकरोति कुमतिं विमलीकरोति चेतश्चिरन्तनमघं चुलुकीकरोति। भूतेषु किं च करुणां बहुलीकरोति सङ्गः सतां किमुन मङ्गलमातनोति॥"(वैराग्यशतकम्)** सतां दर्शनेन कीदृशं मङ्गलं भवति तदत्र वर्णितं वर्तते। स्कन्दपुराणे विष्णुखण्डे भगवान् वेदव्यासोऽपि निगदति यत्- **"हरति हृदयबन्धं कर्मपाशार्दितानां**

**वितरति पदमुच्चैरल्पजल्पैकभाजाम्। जननमरणकर्मश्रान्तविश्रान्तिहेतुस्त्रिजगति मनुजानां दुर्लभः साधुसङ्गः॥"(स्कन्दपुराणे विष्णुखण्डे १)** जन्ममृत्व्योः चक्रात् सन्तः विमुञ्चन्ति। इदं फलमस्ति साधुसमागमस्य। एकस्य महापुरुषस्य समागमेन किं किं न प्राप्यते अर्थात् सर्वं प्राप्यते यथोक्तम्- **"कल्पद्रुमः कल्पितमेव सूते सा कामधुक्कामितमेव दोग्धी। चिन्तामणिश्चिन्तितमेव दत्ते सतां हि सङ्गः सकलं प्रसूते॥"(हितोपदेशः)** कल्पद्रुमस्य कामधेनोः चिन्तामणेश्च सङ्गतिकरणम् एकस्मिन् स्थाने कुत्रचिद् भवति तत्स्थानं नाम सन्तः। महाभारतस्य शान्तिपर्व अपि अस्मिन् सन्दर्भे कथयति यत्- **"यदि सन्तं सेवति यद्यसन्तं तपस्विनं यदि वा स्तेनमेव। वासो यथा रङ्गवशं प्रयाति तथा स तेषां वशमभ्युपैति॥"(महाभारतम् शान्तिपर्व अध्यायः-२९९)** आचार्योद्भटः कथयति- **"भ्रमादपि तु दुष्टानां सङ्गं यः कुरुते जनः। असमर्थः पुनस्त्यक्तुं तत्रैव विनिहन्यते॥"** एतदेव देवर्षिनारदः एकेन सूत्रेण कथयति- **"दुःसङ्गः सर्वथैव त्याज्यः।" "सद्भिरासीत सततं सद्भिः कुर्वीत सङ्गतिम्। सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥"(गरुडपुराणम् पूर्व-११३)** सद्भिस्सह स्थातव्यं, सताम् आदेशपालनं कर्तव्यं, सद्भिः विवादो न कर्तव्यः, सुहृद्भावः सत्सु च स्थापनीयः। सतां सज्जनानां साधूनाम् अवस्थाप्राप्तिः एकवारं भवति पश्चात् तेषां रक्षणाय स्वयं भगवान् पुराणपुरुषोत्तमः बद्धपरिकरः भवति अतएव गीतायां सः कथयति-**परित्राणाय साधूनां....... सम्भवामि युगे युगे॥(श्रीमद्भगवद्गीता- ४/८)**

रामचरितमानसेऽपि भक्तप्रवरः तुलसीदासः कथयति- **बिनु सतसंग बिबेक न होई। रामकथा बिनु सुलभ न सोई॥** रामकथां विना सन्तः न मिलन्ति सद्भिर्विना भगवत्कथाश्रवणं न भवति। एकस्मिन् रतिः अस्ति चेत् द्वितीये प्रीतिः स्वतः भवति। सतां दर्शनेन भक्तप्रवराणां सरलपुरुषाणाम् एकैव याचना भवति- **सन्त सरल चित जगत हित जानि सुभाव सनेहु। बालविनय सुनि करि कृपा रामचरनरति देहु॥(रामचरितमानसे)** सतां जीवनं परोपकाराय एव भवति अतएव कथितं सुभाषिते यथा- **"रविश्चन्द्रो घना मेघाः नदी गावश्च सज्जनाः। एते परोपकाराय युगे देवेन निर्मिताः॥"(सु.र.भा.)** भगवतापि एतेषां समुत्पत्तिः परोपकाराय एव कृता वर्तते। अतः-

**"परोपकाराय वहन्ति नद्यः परोपकाराय दुहन्ति गावः।**
**परोपकाराय फलन्ति वृक्षाः परोपकाराय सतां विभूतयः॥"(सु.र.भा.)**

प्रायः सर्वेऽपि सन्तः समानाः भवन्ति कारणं सतां लक्षणानि समानानि सन्ति तानि लक्षणानि यथा- **"यथा लब्धेऽपि सन्तुष्टः समचित्तो जितेन्द्रियः। हरिपादाश्रयो लोके विप्रः साधुरनिन्दकः॥"निर्वैरः सदयः शान्तो दम्भाहङ्कारवर्जितः। निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते॥"(शास्त्रान्तरे)** सतां लक्षणैः यः विभूषितो भवति तद्दर्शनेन भगवद्दर्शनस्य फलमेव निर्दिष्टं वर्तते। अतः यत्र सतां दर्शनं भवति तत्रास्माभिः दण्डवत्प्रणामाः कर्तव्याः भवन्ति। **"यत्पूजायाः हरेः पूजा दृष्ट्या न यमदर्शनम्। पापक्षयः स्पर्शनाच्च किं परं सत्समागमात्॥ "नमः सद्भ्यः सदा मेऽस्तु येषां चरणधूलिभिः। धन्या वसुन्धरा नित्यं**

**सन्तः साक्षाद्धरेस्तनुः॥** इत्थम्- **"सङ्गमः खलु साधूनां करणीयो मुमुक्षुभिः। जीवनं सफलं तेन पुनरागमनं न हि॥" (इदं मम)**

## उपसंहृतिः

श्रीमन्महाभारते पितामहस्य भीष्मस्य मुखात् भगवतः नारायणस्य सहस्रनामानि विष्णोर्दिव्यसहस्रनाम्ना सुप्रसिद्धानि। तत्र सर्वाण्यपि नामानि एकवचने सन्ति एकं नाम विहाय तच्च नाम - **सन्तः**। अतः पितामहः भीष्मः अपि भगवतः नामस्मरणे सतां बहुमानं कर्तुं बहुवचने तन्नाम स्मरति।भारतस्य परमपावना भूमिरियं सतां पदार्पणेन धन्या सेव्या मान्या च वर्तते। अस्यां भूमौ यावन्तः सन्तः समभवन् न तावदन्यत्र। यत्र अस्माभिः **सन्ततुकारामः, सन्तएकनाथः, सन्तज्ञानेश्वरः, बापासीतारामः, जयजलारामः, आपागीगा, सन्ततुलसीदासः, सन्तदेवीदास-सन्तअमरदासः, सन्तप्रमुखस्वामी, सन्तमस्तरामः, सन्तहरिरामः, सन्तसन्तरामः, सन्तलक्ष्मणदासः, सन्तभोजलरामः, सन्तविठ्ठलनाथः, सन्तमुकुन्दराजः, सन्तरघुनाथः, सन्तभानुदासः, सन्तसुरदासः, सन्तनन्ददासः, सन्तकृष्णदासः, सन्तवीरभानः, सन्तरामदासः, सन्तश्रीरामकृष्णपरमहंसः, सन्तमङ्गलदासः, सन्तसिद्धदासः, सन्तगोविन्ददासः, सन्तश्रीरूपकलालः, सन्तश्रीगोमतीदासः, सन्तगुरुगोविन्दसिंहः, सन्तश्रीकुशलानन्दः, सन्तप्रेमदासः, सन्तब्रह्मानन्दः, सन्तकरपात्रीजीमहाराजः, सन्तदादू, सन्तपहाडीबाबा, सन्तप्रेमभिक्षुमहाराजः, सन्तभक्तिवेदान्तस्वामी, सन्तकाश्मीरीबापु** एते सन्तचरणाः पङ्क्तिपावनाः सन्ति एतेषु कस्यचिदेकस्यापि जीवनचरित्रं श्रूयते कथ्यते वा जीवनशैलीं ज्ञायते चेत् मानवजीनस्य सार्थक्यं कुत्र कदा कथं च भवति कोऽयं कृपाप्रसादः किं च सतां महत्त्वम् एतत्सर्वमपि शास्त्रानुसरणेन सतामनुसरणेन भारतदेशे जन्मना च प्राप्तुं ज्ञातुं च शक्यते। एतेषु विरलेषु सच्चरित्रेषु सत्सु प्रणामाञ्जलिपुरःसरं लेखोऽयं सतां सेवायां समर्प्यते। सतां कृपाप्रसादेन विचारोऽयं सम्प्रातः लेखोऽयं च लिखितः अनेनान्तःकरणशुद्धिरस्तु॥

**॥ इति शम्॥**

## सन्दर्भग्रन्थसूचिः

१. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर
२. श्रीमद्भगवद्गीता तेना मूळ रूपे, श्री १००८ भक्तिवेदान्तस्वामीजी महाराज,
३. श्रीमद्भागवतमहापुराणम्, गीताप्रेस, गोरखपुर
४. महाभारतम्, गीताप्रेस, गोरखपुर
५. गरुडपुराणम्, नाग पब्लिकेशन, नई दिल्ली

६. मनुस्मृतिः, चौखम्बा प्रकाशन, वाराणसी
७. योगवासिष्ठः, गीताप्रेस, गोरखपुर
८. सुभाषितरत्नभाण्डागारः, चौखम्बा प्रकाशन, वाराणसी
९. हितोपदेशः (मित्रलाभः), चौखम्बा प्रकाशन, वाराणसी
१०. रामचरितमानस, गीताप्रेस, गोरखपुर
११. श्रीमद्वाल्मीकिरामायणम्, गीताप्रेस, गोरखपुर
१२. नीतिशतकम्, चौखम्बा प्रकाशन, वाराणसी
१३. उत्तररामचरितम्, चौखम्बा संस्कृत भवन, वाराणसी
१४. मुद्गलोपनिषद्
१५. मोहमुद्गलस्तोत्रम्
१६. साहित्यदर्पणः, चौखम्बा प्रकाशन, वाराणसी
१७. अभिज्ञानशाकुन्तलम्, सरस्वती पुस्तक भण्डार, अहमदाबाद
१८. वैराग्यशतकम्
१९. विवेकचूडामणिः
२०. स्कन्दपुराणम्, गीताप्रेस, गोरखपुर
२१. मानसागरी, चौखम्बा संस्कृत प्रकाशन, वाराणसी